श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ त्रिषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिषष्टितमः सर्गः ॥

## राज्ञो दशरथस्य शोकस्तेन कौसल्यां प्रति स्वकर्तृकमुनिकुमारवधविषयकप्रसङ्गस्य श्रावणम्

प्रतिबुद्धो मुहूर्तेन शोकोपहतचेतनः।
अथ राजा दशरथः स चिन्तामभ्यपद्यत ॥ **2.63.1** ॥

रामलक्ष्मणयोश्चैव विवासाद् वासवोपमम्।
आपेदे उपसर्गस्तं तमः सूर्यमिवासुरम् ॥ **2.63.2** ॥

सभार्ये हि गते रामे कौसल्यां कोसलेश्वरः।
विवक्षुरसितापाङ्गीं स्मृत्वा दुष्कृतमात्मनः ॥ **2.63.3** ॥

स राजा रजनीं षष्ठीं रामे प्रव्राजिते वनम्।
अर्धरात्रे दशरथः सोऽस्मरद् दुष्कृतं कृतम् ॥ **2.63.4** ॥

स राजा पुत्रशोकार्तः स्मृत्वा दुष्कृतमात्मनः।
कौसल्यां पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ **2.63.5** ॥

यदाचरति कल्याणि शुभं वा यदि वाशुभम्।
तदेव लभते भद्रे कर्ता कर्मजमात्मनः ॥ **2.63.6** ॥

गुरुलाघवमर्थानामारम्भे कर्मणां फलम्।
दोषं वा यो न जानाति स बाल इति होच्यते ॥ **2.63.7** ॥

कश्चिदाम्रवणं छित्त्वा पलाशांश्च निषिञ्चति।
पुष्पं दृष्ट्वा फले गृध्नुः स शोचति फलागमे॥ **2.63.8** ॥

अविज्ञाय फलं यो हि कर्म त्वेवानुधावति।
स शोचेत् फलवेलायां यथा किंशुकसेचकः॥ **2.63.9** ॥

सोऽहमाम्रवणं छित्त्वा पलाशांश्च न्यषेचयम्।
रामं फलागमे त्यक्त्वा पश्चाच्छोचामि दुर्मतिः॥ **2.63.10** ॥

लब्धशब्देन कौसल्ये कुमारेण धनुष्मता।
कुमारः शब्दवेधीति मया पापमिदं कृतम्॥ **2.63.11** ॥

तदिदं मेऽनुसम्प्राप्तं देवि दुःखं स्वयङ्कृतम्।
सम्मोहादिह बालेन यथा स्याद् भक्षितं विषम्॥ **2.63.12** ॥

यथान्यः पुरुषः कश्चित् पलाशैर्मोहितो भवेत्।
एवं मयाप्यविज्ञातं शब्दवेध्यमिदं फलम्॥ **2.63.13** ॥

देव्यनूढा त्वमभवो युवराजो भवाम्यहम्।
ततः प्रावृडनुप्राप्ता मम कामविवर्धिनी॥ **2.63.14** ॥

अपास्य हि रसान् भौमांस्तप्त्वा च जगदंशुभिः।
परेताचरितां भीमां रविराचरते दिशम्॥ **2.63.15** ॥

उष्णमन्तर्दधे सद्यः स्निग्धा ददृशिरे घनाः।
ततो जहृषिरे सर्वे भेकसारङ्गबर्हिणः॥ **2.63.16** ॥

क्लिन्नपक्षोत्तराः स्नाताः कृच्छ्रादिव पतत्रिणः।
वृष्टिवातावधूताग्रान् पादपानभिपेदिरे॥ **2.63.17** ॥

पतितेनाम्भसाऽऽच्छन्नः पतमानेन चासकृत्।
आबभौ मत्तसारङ्गस्तोयराशिरिवाचलः॥ **2.63.18** ॥

पाण्डुरारुणवर्णानि स्रोतांसि विमलान्यपि।
सुस्रुवुर्गिरिधातुभ्यः सभस्मानि भुजङ्गवत् ॥ **2.63.19** ॥

तस्मिन्नतिसुखे काले धनुष्मानिषुमान् रथी।
व्यायामकृतसङ्कल्पः सरयूमन्वगां नदीम् ॥ **2.63.20** ॥

निपाने महिषं रात्रौ गजं वाभ्यागतं मृगम्।
अन्यद् वा श्वापदं किञ्चिज्जिघांसुरजितेन्द्रियः ॥ **2.63.21** ॥

अथान्धकारे त्वश्रौषं जले कुम्भस्य पूर्यतः।
अचक्षुर्विषये घोषं वारणस्येव नर्दतः ॥ **2.63.22** ॥

ततोऽहं शरमुद्धृत्य दीप्तमाशीविषोपमम्।
शब्दं प्रति गजप्रेप्सुरभिलक्ष्यमपातयम् ॥ **2.63.23** ॥

अमुञ्चं निशितं बाणमहमाशीविषोपमम्।
तत्र वागुषसि व्यक्ता प्रादुरासीद् वनौकसः ॥ **2.63.24** ॥

हा हेति पततस्तोये बाणाद् व्यथितमर्मणः।
तस्मिन्निपतिते भूमौ वागभूत् तत्र मानुषी ॥ **2.63.25** ॥

कथमस्मद्विधे शस्त्रं निपतेच्च तपस्विनि।
प्रविविक्तां नदीं रात्रावुदाहारोऽहमागतः ॥ **2.63.26** ॥

इषुणाभिहतः केन कस्य वापकृतं मया।
ऋषेर्हि न्यस्तदण्डस्य वने वन्येन जीवतः ॥ **2.63.27** ॥

कथं नु शस्त्रेण वधो मद्विधस्य विधीयते।
जटाभारधरस्यैव वल्कलाजिनवाससः ॥ **2.63.28** ॥

को वधेन ममार्थी स्यात् किं वास्यापकृतं मया।
एवं निष्फलमारब्धं केवलानर्थसंहितम् ॥ **2.63.29** ॥

न क्वचित् साधु मन्येत यथैव गुरुतल्पगम्।
नेमं तथानुशोचामि जीवितक्षयमात्मनः॥ **2.63.30** ॥

मातरं पितरं चोभावनुशोचामि मद्वधे।
तदेतन्मिथुनं वृद्धं चिरकालभृतं मया॥ **2.63.31** ॥

मयि पञ्चत्वमापन्ने कां वृत्तिं वर्तयिष्यति।
वृद्धौ च मातापितरावहं चैकेषुणा हतः॥ **2.63.32** ॥

केन स्म निहताः सर्वे सुबालेनाकृतात्मना।
तां गिरं करुणं श्रुत्वा मम धर्मानुकाङ्क्षिणः॥ **2.63.33** ॥

कराभ्यां सशरं चापं व्यथितस्यापतद् भुवि।
तस्याहं करुणं श्रुत्वा ऋषेर्विलपतो निशि॥ **2.63.34** ॥

सम्भ्रान्तः शोकवेगेन भृशमासं विचेतनः।
तं देशमहमागम्य दीनसत्त्वः सुदुर्मनाः॥ **2.63.35** ॥

अपश्यमिषुणा तीरे सरय्वास्तापसं हतम्।
अवकीर्णजटाभारं प्रविद्धकलशोदकम्॥ **2.63.36** ॥

पांसुशोणितदिग्धाङ्गं शयानं शल्यवेधितम्।
स मामुद्वीक्ष्य नेत्राभ्यां त्रस्तमस्वस्थचेतनम्॥ **2.63.37** ॥

इत्युवाच वचः क्रूरं दिधक्षन्निव तेजसा।
किं तवापकृतं राजन् वने निवसता मया॥ **2.63.38** ॥

जिहीर्षुरम्भो गुर्वर्थं यदहं ताडितस्त्वया।
एकेन खलु बाणेन मर्मण्यभिहते मयि॥ **2.63.39** ॥

द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे।
तौ नूनं दुर्बलावन्धौ मत्प्रतीक्षौ पिपासितौ॥ **2.63.40** ॥

चिरमाशां कृतां कष्टां तृष्णां सन्धारयिष्यतः।
न नूनं तपसो वास्ति फलयोगः श्रुतस्य वा॥ **2.63.41** ॥

पिता यन्मां न जानीते शयानं पतितं भुवि।
जानन्नपि च किं कुर्यादशक्तश्चापरिक्रमः॥ **2.63.42** ॥

भिद्यमानमिवाशक्तस्त्रातुमन्यो नगो नगम्।
पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव॥ **2.63.43** ॥

न त्वामनुदहेत् क्रुद्धो वनमग्निरिवैधितः।
इयमेकपदी राजन् यतो मे पितुराश्रमः॥ **2.63.44** ॥

तं प्रसादय गत्वा त्वं न त्वा सङ्कुपितः शपेत्।
विशल्यं कुरु मां राजन् मर्म मे निशितः शरः॥ **2.63.45** ॥

रुणद्धि मृदु सोत्सेधं तीरमम्बुरयो यथा।
सशल्यः क्लिश्यते प्राणैर्विशल्यो विनशिष्यति॥ **2.63.46** ॥

इति मामविशच्चिन्ता तस्य शल्यापकर्षणे।
दुःखितस्य च दीनस्य मम शोकातुरस्य च॥ **2.63.47** ॥

लक्षयामास स ऋषिश्चिन्तां मुनिसुतस्तदा।
ताम्यमानं स मां कृच्छ्रादुवाच परमार्थवित्॥ **2.63.48** ॥

सीदमानो विवृत्ताङ्गोऽचेष्टमानो गतः क्षयम्।
संस्तभ्य शोकं धैर्येण स्थिरचित्तो भवाम्यहम्॥ **2.63.49** ॥

ब्रह्महत्याकृतं तापं हृदयादपनीयताम्।
न द्विजातिरहं राजन् मा भूत् ते मनसो व्यथा॥ **2.63.50** ॥

शूद्रायामस्मि वैश्येन जातो नरवराधिप।
इतीव वदतः कृच्छ्राद् बाणाभिहतमर्मणः॥ **2.63.51** ॥

विघूर्णतो विचेष्टस्य वेपमानस्य भूतले।
तस्य त्वाताम्यमानस्य तं बाणमहमुद्धरम्।
स मामुद्वीक्ष्य सन्त्रस्तो जहौ प्राणांस्तपोधनः॥ **2.63.52** ॥

जलार्द्रगात्रं तु विलप्य कृच्छ्रं
मर्मव्रणं सन्ततमुच्छ्वसन्तम्।
ततः सरय्वां तमहं शयानं
समीक्ष्य भद्रे सुभृशं विषण्णः॥ **2.63.53** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे त्रिषष्टितमः सर्गः॥